# अथ आमन्त्रणोत्सवस्तोत्रम्

आमन्त्रणं ते निगमोक्तमन्त्रैस्तन्त्रप्रवेशाय मनोहराय ।
श्रीरामचन्द्राय सुखप्रदाय करोम्यहं त्वं कृपया गृहाण ॥१॥

सत्याधिराजार्चितपादपद्म श्रीमध्वसम्पूजित सुन्दराङ्ग ।
श्रीभार्गवीसन्नुतमन्दहास श्रीव्यासदेवाय नमो नमस्ते ॥२॥

अनन्तरूपैरजितादिभिश्च परादिभिः श्रीबृहतीसहस्रैः ।
विश्वादिभिश्चैव सहस्ररूपैर्नारायणाद्यष्टशतैरजाद्यैः ॥३॥

एकाधिपञ्चाशदितैश्च रूपैः श्रीकेशवाद्यैश्च चतुस्त्रिविंशैः ।
मत्स्यादिभिस्स्वच्छदशस्वरूपैर्विश्वादिभिश्चाष्टभिरग्ररूपैः ॥४॥

तथाऽनिरुद्धादिचतुस्स्वरूपैर्गोब्राह्मणश्रीतुलसीनिवासैः ।
मन्त्रेशरूपैः परमाणुपूर्वसंवत्सरान्तामलकालरूपैः ॥५॥

ज्ञानादिदैस्स्थावरजङ्गमस्थैरव्याकृताकाशविहाररूपैः ।
नारायणाख्येन तथाऽनिरुद्धरूपेण सक्ष्मोदगतेन तुष्ट्यै ॥६॥

प्रद्युम्नसङ्कर्षणनामकाभ्यां भोक्तृस्थिताभ्यां भुजिशक्तिदाभ्याम् ।
श्रीवासुदेवेन नभःस्थितेन ह्यभीष्टदेनाखिलसद्गुणेन ॥७॥

अश्वादिसद्यानगतेन नित्यमारूढरूपेण सुसौख्यदेन ।
विश्वेन जाग्रद्विनियामकेन स्वप्नस्थपालेन च तैजसेन ॥८॥

प्राज्ञेन सौषुप्तिकपालकेन तुर्येण मूर्ध्नि स्थितियुक्परेण ।
आत्मान्तरात्मेत्यभिधेन हृत्स्थरूपद्वयेनाखिलसारभोक्त्रा ॥९॥

हृत्पद्ममूलाग्रगसर्वगैश्च रूपत्रयेणाखिलशक्तिभाजा ।
कृद्धोल्करूपैर्हृदयादिसंस्थैः प्राणादिगैरन्नमयादिगैश्च ॥१०॥

इलावृताद्यामलखण्डसंस्थैः प्लक्षादिसद्वीपसमुद्रधिष्ण्यैः ।
मेरुस्थकिंस्तुघ्नगकालचक्रग्रहग्रहानुग्रहिभिश्च लोकैः ॥११॥

नारायणीपूर्ववधूरुरूपैस्त्रिधामभिर्भासुरधामभिश्च ।
श्रीमूलरामप्रतिमादिसंस्थश्रीरामचन्द्राखिलसद्गुणाब्धे ॥१२॥

सीतापते श्रीपरमावतार मायादिभिर्ब्रह्ममुखैश्च देवैः ।
दिक्पालकैस्साकमनन्तसौख्यसम्पूर्णसद्भक्तदयाम्बुराशे ॥१३॥

सत्याधिराजार्यहृदब्जवास श्रीमध्वहृत्पङ्कजकोशवास ।
(श्रीसत्यप्रमोदार्यहृदब्जवास श्रीमध्वहृत्पङ्कजकोशवास ।)
मद्बिम्बरूपेण भवैक्यशाली चामन्त्रितस्त्वद्य नमो नमस्ते ॥१४॥

वराक्षतान् काञ्चनमुद्रिकाश्च मन्त्रेण हेम्नश्चषके निधाय ।
सीतापते ते पुरतश्श्रुतेस्तु प्रदध्युरेवं भगवत्स्वरूपम् ॥१५॥

हिरण्यरूपस्स हिरण्यसंदृगपां नपात् सेदु हिरण्यवर्णः ।
हिरण्ययात् परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥१६॥

वसिष्वोत्तमवस्त्राणि भूषणैरप्यलङ्कुरु ।
कुर्वन्नुत्सवमत्यन्तमस्मदीयं मखं यज ॥१७॥

वसि॑ष्वा॒ हि मि॑येध्य॒ वस्त्रा॑ण्यूर्जां पते ।
सेमं॑ नो अध्व॒रं य॑ज ।(ऋ.१.२६.१) ॥◆॥

आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
मन्त्रेशैर्लोकपालैश्च सार्धं देवगणैः श्रिया ॥१८॥

त्रिकालपूजासु दयार्द्रदृष्ट्या मयार्पितं चार्हणमाशु सत्वम् ।
गृहाण लोकाधिपते रमेश ममापराधान् सकलान् क्षमस्व ॥१९॥

श्रीमत्सत्यप्रमोदार्यहृन्निवास्यनिलेशिता ।
सत्यज्ञानानन्तगुणः प्रीयतां बादरायणः ॥२०॥

॥ इति आमन्त्रणोत्सवस्तोत्रम् ।।